## ।। षट्त्रिंशोऽध्याय: ।। Chapter - 36

बसिष्ठ उवाच :- तत्रास्तेऽद्भुतमथापि मातृणामालये नृप ।।
तच्छृणुष्व महाराज यदि ते कौतुकं महत् ।। १

आर्याकूप इति ख्यातस्तत्रास्ते विमलोदक: ।।
पुष्पमाकालिकं सूते द्रुम: सिक्तो यदम्बुभि: ।। २

तासां समीपे मातृणां विद्येते पनसौ द्रुमौ ।।
तयो: सूर्योदये छाया याति प्राचीमुखं नृप ।। ३

अस्तकाले तथार्कस्य प्रतीचीं प्रतिगच्छति ।। ४

आर्याकूपे नर: स्नात्वा आर्यादीपाञ्जनेन य: ।।
अञ्जयेन्नयने राजन् स तौ पश्यति पादपौ ।। ५

तयोस्तु फलमास्वाद्य स्वादयुक्तं पवैर्लिभि: ।।
कलौ युगे पि भूपाल खेचर:स भवेत्क्षणात् ।। ६

मातृणां पुरत: कुर्याद्दीपं य: सर्पिषा नर: ।।
न स्यादन्ध: पुमांस्तस्यकुले कश्चित् कदाचन ।। ७

----

२ ई तैपनसौ नृप: ।। द्रुमौतयो सूर्योदयेछायैयात: प्राचीमुखे नृप:
३ ई कालौयुगे
३ ए द्रुमौ ( ए १) पूष्प ( ए ३) कलौ

आर्याणामग्रतो[1] भक्त्या कुमारीर्भोजयेत[2] वै ।।
विपदस्तस्य नश्यन्ति यमदंष्ट्रो[3][4]द्भवा अपि[4] ।। ८

आख्यातं चण्डमुण्डायामाहात्म्यमिदमुत्तमं ।।
यस्य श्रवणमात्रेण दूरं यान्ति महाग्रहा: ।। ६

वसिष्ठ उवाच :- ततो गच्छेन्महाराज चण्डीशं लोकविश्रुतम् ।
य दृष्ट्वा मानवो मर्त्यो नमूर्खो[5] जायते नृप ।। १०

श्रीमाले खलु चण्डीशं ये चार्चयन्ति सकृन्नरा: ।।
कल्पान्तेऽपि न ते रा जंल्लोकभ्रष्टा: पतन्ति वै ।। ११

मान्धातोवाच :- श्रीमाले देवदेवेश:[6] कथं चण्डीशसंज्ञया ।।
कृतावतारो ब्रह्मर्षे तन्मे कथय विस्तरात् ।। १२

यथा यथा भगवान् भाषसे तीर्थसम्भवम् ।
तथातथा मम श्रोतुं जायते प्रवणं[7] मन: ।। १३

वसिष्ठ उवाच :- श्रूयतां[8] राजशार्दूल कथामेतां मनोहराम् ।।
यथा चण्डीशनाम्नासौ श्रीमालेऽभून्महेश्वर : ।। १४

----

२बी कु-मारीर्भोजयन्ति ये
३ स ई-डी- भोजयन्तिवै ई कुमारी भोजयन्तिवै:
४ ई बी १ यदि ( ए डे) ष्ट्रो (ए ठ) हरी १ ए भवा
५ ए नमूर्खो ३ ए पेश: ७ बी प्रवण ८ ए श्रूयतांराजशार्दूल
श्लोक १ से ६ तक ए में नहीं है ।
पाण्डुलिपि ई में श्लोक ६ अध्याय ३६ प्रारम्भ होता है श्लोक
बसिष्ट उवाच- ततोगच्छे

मातृराराध्यतौ दैत्यौ चण्डमुण्डौ महीपते ।।
दैव्या दत्ताभयौ लोकान् प्रमथ्नीत: पुरा[1]भृशम्। १५

ततो देवा: सहेन्द्रेण ब्रह्माणं शरणं ययु: ।।
[2]सिद्धै: साध्यैस्तथा यक्षै: सह गन्धर्वकिन्नरै: ।। १६

विद्याधराप्सरोभिश्च वसुभि: समरुद्गणै: ।।
ब्रह्माणमिदमाहुस्ते बद्धाञ्जलिपुटा: सुरा: ।। १७

देवा ऊचु :- चण्डमुण्डौ महादैत्यौ सम्भूतौ भूतले पुन: ।।
अभयं प्राप्य मातृभ्यां बाधते भुवनत्रयम्। १८

मरुजंगलमासाद्य दुर्गं[3] जलबहिष्कृतम्।
उर्जितं जगत्ताभ्यां प्रजा: पाहि पितामह ।। १९

पितामह उवाच यास्याम: सहिता: सर्वे श्रीमालं क्षेत्रमुत्तमम्।
मातरश्चण्डमुण्डायास्तत्र ताभ्यां प्रसादिता: ।। २०
[4]ता एव कथयिष्यन्ति तद्वधोपायमञ्जसा ।। २१

----

३ बी ई दुर्गं बहुजलं कृतम्   ( ए २) सिद्धि: (ए ४) ताएव
( १ ए) भृशं

बसिष्ठ उवाच :-इत्युक्तास्तै ततो दैबा राजन्सार्द्धि स्वयंभुवा ।।
श्रीमालमाययु: शीघ्रं यत्र ता: सन्ति मातर: ।। २२

कीर्तिमानग्रतो यासामार्याकूपोऽस्ति विश्रुत: ।।
अदृश्यौ मानवानां च पनसौ यत्र तिष्ठत: ।। २३

तत्र गत्वा सुरै: सार्द्धं ब्रह्मा लोकेपितामह: ।।
प्रत्यक्षीकृत्य ता देवीरिदमुचे कृताञ्जलि ।। २४

ब्रह्मोवाच ।। एतै दैव्य: सुरा: सर्वे समीयु: शरणार्थिता: ।
अर्दिताश्चण्डमुण्डाभ्यां जगत्त्रयकदर्यनात् ।। २५

युष्माभिरभये दत्ते कस्तौ हन्तुं प्रभुर्भवेत् ।।
दैवो वा दैवराजो वा सिद्धो गन्धर्व एव वा ।। २६

तदादिशत दैवानांक्षुद्योपायमाशु वै ।।
न विनश्यति येनेदं त्रैलोक्यं सचराचरम् ।। २७

----

तद्धर्यो (ए १) के (ए २) तै दैव्य: (ए३) भवैत्

दैव्यू ऊचु :- अस्माभिरमयं दत्तमैताभ्यां कमलासन् ।।
अतौ न हन्म्यो[1] दैत्यौ विश्वबाधाकरावपि ।। २८

ब्रह्मोवाच :- सर्वेषामपि दैत्यानां चण्डिका त्रासकारिणी[2] ।।
यामस्तां शरणं दैवी युष्माभ्यं रोचते यदि ।। २९

दैव्यू ऊचु :- अस्माकं त्रिषु लोकेषु यानि रूपाणि कानि[3] वै ।।
अलंस्तैरपि कर्त्तव्यो न वधश्चण्डमुण्डयोः ।। ३०

एवं प्रसादितास्ताभ्यां वयं जाता वरप्रदाः ।।
इति मत्वा जगन्नाथ कुरु यत्तव रोचते ।। ३१

वसिष्ठ उवाच :- इत्थं संशयिते तत्र मातृभिः[4] सह वेधसि ।।
आजगाम जगद्धात्री चण्डी चण्डाकृतिर्नृप ।।
कृपया परया दैवी ब्रह्माणमिदमब्रवीत् ।। ३२

दैव्युवाच :- संशयः किमयं दैव वर्त्तते तव चैतसि ।।
त्वमस्य जगतो धाता प्रभुस्त्वं महतामपि ।। ३३

----

१ ख डी- नहन्म: प्रेहिदैनैयौ ई लदन्यप्रैहिदैत्यैयौ विश्व
बी न हन्मस्तौ हि दैत्यौ यौ विश्वबाधाकरावपि ।।
२ क सी ख डी घ ई प्रान्तकारिणी ए-२ त्रासकारिणी
३ बी ई कानि वै ( ए१) न हन्मनस्तदैत्यौ ( ए१बि) भि

प्राणत्राणाय लोकानां चण्डमुण्डवधाय च ।।
अहमाराधयिष्यामि देवदेवं महेश्वरम् ।। ३४

ब्रह्मोवाच :- प्रसीद देवदेवेशि शरणागतवत्सले ।।
एते लोकाः समुद्विग्नाश्चण्डमुण्डविचेष्टितैः ।। ३५

देव्युवाच :- स्वस्थाः सर्वे सुराः सन्तु स्थाने तिष्ठिन्तु मातरः ।।
अत्रैवाराधयिष्यामि[1] जगतामीश्वरं हरम् ।। ३६

वसिष्ठ उवाच :-इत्युक्त्वा चण्डिका राजन् विविक्ते विमले शुचौ ।।
प्रदेशे स्थितिमाधाय तपस्कर्तुं समुद्यता ।। ३७

देवा दिवं ययुः सर्वे ततः सार्द्धं स्वयम्भुवा[2] ना ।।
देव्यः पर्यचरंस्तत्र तप्यमानाम महेश्वरीम् ।। ३८

चण्डी चण्डबला चण्डमुण्डनाशाय मातरः ।।
विश्चय्यासनं पाद्मं[3] विभ्रती हृदि शंकर ।। ३९
प्राचीनाग्रेषु दर्भेषु तस्थौ मीलितलोचना ।। ४०

---

१ बी ई- अत्रैवाराधयिष्येऽहं जगतामीश्वरं
२ ई म्भुवा । ( ए १) भुना ( ए ३) पाद्यं

ब्रह्मदण्डाभिघातेन ब्राह्मी कुण्डं चकार ह ।।
सुमृष्टजलसंम्पूर्णं पवित्रं पापनाशनम् ।। ४१

माहेशी वन्हिशुश्रूषां कुरुते ज्वालनादिभिः ।।
समित्कुशाधाहरणैः कौमारी शिखिवाहना ।। ४२

वैष्णावी चक्रहस्ता च भूमिरक्षास्ववस्थिता ।।
ऐन्द्री तु विधिनैपुण्यादुपद्रष्टुः पदे स्थिता ।। ४३

वाराही जलसम्पूर्णान्कलशानाजहार वै ।।
नारसिंही समीपस्था तालवृन्तावधूननैः ।।
अत्युग्रं चण्डिकां शक्तिमुपास्ते तपसि स्थिताम् ।। ४४

दूतो यया कृतः शम्भुः पार्श्वे शुम्भनिशुम्भयोः ।।
शिवदूतीति सा देवी शिवं दध्यौ महामनाः ।। ४५

तले
शूलादीनि महास्त्राणि सर्वे विन्यस्य चण्डिका ।।
रक्षामोदरी कृशतनुरस्थिचर्म्मावगुण्ठिता ।। ४६

-----

१ ई सी डी १ (कद) समित्कुशाधाभरणै
सी २ शमोदरी
२ ए वैष्णावी ४ ए शुम्भनिशुम्भ
३ ए भूमि

क्रूरदंष्ट्रान्तराला च सैव्यमाना हि शक्तिभि: ।।
अग्नै: सन्धुक्ष्यमाणास्य धूमलैखेव सा बभौ ।। ४७

दैवेशं प्रियमीशानमात्मनि प्रणयाकुला ।।
बिभ्रती भुवनत्राणकारणैन व्यवस्थिता ।। ४८

मातृभि: प्रैर्यमाणापि माता विश्वस्य चण्डिका ।।
नाऽऽदातुं कुरुतै चैत: कन्दमूलफलान्यपि ।। ४६

न पत्रं न फलं नाम्बु न वायुं लभतै[1] क्वचित् ।।
शिवध्यानपरा दैवी तस्थौ तन्नैकमानसा ।। ५०

सा वै तपस्विनां क्षान्तिरक्षान्तिरमरद्विषाम् ।।
सा च विद्या मुमुक्षूणामविद्या गृहमैधिनाम् ।। ५१

सैव श्रद्धा महर्षीणामश्रद्धा दुष्टचैतसाम् ।।
तपस्तप: फलं चापि प्रज्ञा प्रज्ञानमैव वा ।। ५२

ध्यानं धात्री तथा ध्यैयं सैव विश्वै प्रतिष्ठिता ।।
ऐवं तपस्यमानायां तस्यां त्रैलौक्यमातरि ।। ५३

-----

१ सी बी बाऽशनुतै कै बदलै ( भ्रान्त:पाठ) ख डी वास्ततै
(इत्यपिभ्रांत)

~~श्लौक~~ ~~श्लौक~~ ~~धूमलैखैव~~

( ४२) सन्धुक्ष्यमाणास्य

न सेहे भारमुद्धोर्दुभूतधात्री कथंचन ।।
न भूवो भूधरा राजन्नाद्रीणामपि दिग्गजा ।। ५४

न शेषो नादिकोलश्च न तु कूर्मो महानपि ।।
सा शक्ति: सर्वगा चण्डी शिवैकार्ग्रतया स्थिता ।। ५५

ततश्चकम्पे पृथिवी चुक्षोभ ममकरालय: ।।
शीर्यन्ति पर्वताग्राणि न-द्योऽपि परिवर्तिता ।। ५६

शक्त्यावतिष्ठते कश्चिन्न स्थास्नु न चरिष्णु च ।।
नि:सत्वमिव सर्वं हि सत्तामात्रं प्रदृश्यते ।। ५७

हाहाकारो महानासीन् महर्षीणां महात्मनाम् ।।
सीदतो वीक्ष्य लोकांस्त्रीन् शक्त्याभावान्नरेश्वर ।। ५८

अथोवाच महेशानमासीनंस्फटिकाचलम् ।।
महासेन: प्रसाद्यैनं प्रणत: प्रह्वया गिरा ।। ५६

महासेन उवाच :- देवदेव जगन्नाथ प्रभो स्वामिन् महेश्वर ।।
न बुध्यते कथं देवी तप्यमाना महत्तप: ।। ६०

----

१ बी सत्वं २ ए तत

३ ई महौजसि ।। ४७(( त्मनांसी

४ ए तपम् : ( ए ५) मुत ( ए ६) नं

सा तव प्रेयसी तस्या भृशं प्रियतमो भवान् ।।
तत्किं दर्शनमात्रे पि तवैदृग्[1] बद्धमुष्टिता ।। ६१

अथवा भाति सत्यैव ममैयं लौकिकी श्रुतिः ।।
तत्त्ववतो नावसीयन्ते हीश्वराणां प्रवृत्तयः ।। ६२

अधुना तु मही सर्वा कम्पते सह पर्वतैः ।।
मीनाहता सरोगर्भे पद्मिनीव सहाम्बुभिः ।। ६३

अभिलाषप्रदानस्य जगन्मातुर्महेश्वर ।।
सर्वेषां सर्वदस्यापि[2] तव कोऽयमवग्रहः ।। ६४

दूरस्थस्यापि तुष्यन्ति न तुष्यन्त्युपसेदुषः ।।
आऽधीनं भागधेयानामेव लोकेऽप्यभीप्सिनः ।। ६५

क्षणादनुगृहाणेमां चण्डिकां शक्तिभृल्लक्षणाम् ।।
अस्याः कलुषिते चित्ते मा भूल्लोकविपर्ययः ।। ६६

वसिष्ठ उवाच :- तच्छ्रुत्वा बाहुलेयस्य वाक्यं विश्वोपकारि तत् ।।
ध्यानमीलितनेत्रोऽभूत्तत्रैव परमेश्वरः ।। ६७

---

(ए १) दग्   (ए २) द

अथौदस्थान् महल्लिंग चण्डिकाया:पुरी नृप ।।
मातृणां प्रैक्षमाणानां श्रीमाले वत्सले श्रिया: ।। ६८

सप्तपातालनिर्भेदाज्जाता भूरिति निश्चला ।।
अशिवानि शिवं भेजु: शिवे दर्शनमीयुषि ।। ६९

प्रससेदु: सागराम्भांसि नद्य: प्रकृतिमाययु: ।।
भूतानि स्वरधर्मितानि जातानि शिवदर्शनात् ।। ७०

अथ देवीऽब्रवीद्देवीं लिंगस्य कुहरे स्थित: ।।
व्यक्तं लक्ष्यते रूपं श्रूयते केवलं वच: ।। ७१

देवदेव उवाच :- हेतुना केन ते चण्डि यत्नस्तपसि निश्चला: ।।
किमप्राप्यं तवास्तीति जगन्मातुर्जगत्त्रयै[1] ।। ७२

देव्युवाच :- को ब्रूते न्तर्हितोऽसि त्वमेवं[2] कृत्वा महत्तप: ।।
यदि दर्शनमायासि तदो वक्ष्यामि शंकर ।। ७३

वसिष्ठ उवाच :- इत्युक्तेश तया देव्या प्रत्यक्षोऽभून् महेश्वर: ।।
स्मयमानो महाराज लिंगमध्यात् वृषध्वज[3]: ।। ७४

----

१ बी ई जगन्मातुर्जगत्त्रयै
बी २ त्वमेवं क कोब्रूतेतर्हिसार्ध्दं , सईबी का ब्रूते
ई २ घ कोब्रूतेताहिते (१ ए) वृषध्वज:

ततस्तं वीक्ष्य भूतेशं प्रत्यक्षं गिरिजाप्रियम् ।
हर्षात्पुलकिता देवी तुष्टाव सह मातृभिः ।। ७५

देव्युवाच :- नमो देव महादेव महाभूतमहेश्वर ।।
विश्वरूप विरूपाक्षाव्यक्त लक्षणवर्जित ।। ७६

नित्यानित्यमय स्थूलसूक्ष्मभूतभवात्मक ।।
नमो नमस्ते वरद विश्वरूप परात्पर ।। ७७

अपार पार परम परब्रह्म तमः पर ।।
प्रसीद जगतामीश देवदेव सनातन ।। ७८

नमश्चिन्मय चिद्रूप चित्प्रकाश चिरंतन ।।
नमो चिन्मय कूपाय मेध्याय मेहसे नमः ।। ७९

नमः सोमाय वाताय वास्तुपाय च वास्तवे ।।
नमो निरंहसे तुभ्यं नमस्ताराय शम्भवे ।। ८०

नमो श्यार्याय चार्याय नमः किंचिन्मयाय ते ।।
पशवे पशुनाथाय हविषे च हविर्भुजे ।। ८१

---

३ ए-ई - धनेश्वर ४ बी नमस्ते विश्वरूपाक्ष त्र्यक्ष लक्षणवर्जित ।
६ सी ई डी ब अपारपारपरं, ७ बी नमो चिन्मय कूपाय ( स्यात् )
८ बी नमो ह्यनीहसे तुभ्यं १ ए हर्षात्पूल २ ए मातृभिः
९ ई बी नमः पार्याय वार्याय नमः ५ ए भूतभवभवात्मक
६ ई ब्रह्मतमः परं

नम: कपर्दिने तुभ्यं परज्ञाय च जिष्णवे ।।
नमस्ते विश्वभूताय वेदानां हृदयाय च ।। ८२

नमोऽन्धसे महेशाय महारूपाय धन्विने ।।
पञ्चवक्त्राय रूपाय व्यापिने हिंसिने नम: ।। ८३

प्रत्यक्षातीत शब्दार्थदुर्विज्ञेयोपमापर ।।
अर्थापत्तिनिरस्ताय भावाभावाय भास्वते ।। ८४

न विदुस्ते परं रूपं योगिनो पि निरञ्जना : ।।
तत: स्तोत्रपदे शम्भो नम एवास्तु मत्कृतम् ।। ८५

न वेदो पि हि वेद त्वां स्वयंभूरिति शुश्रुम: ।।
सा च देवी पराशक्तिस्तस्मादव्यय तेनम: ।। ८६

वसिष्ठ उवाच :- इत्थं स्तुतस्तथा देव्या श्रीमाले शक्तिभि: सह ।।
उवाच मधुरं वाक्यं प्रसन्न: परमेश्वर: ।। ८७

देवदेव उवाच :- अचिन्त्यात्त्वं पराशक्तिर्लोकानामाश्रय: पर: ।।
यत्र त्वमसि तत्राहं यत्राहं तत्र चण्डिका ।। ८८

----

१ बी ई नम: कपर्दिने ब्रह्मपरज्ञानाय जिष्णवे
२ बी ई विश्वरूपाय ३ बी दर्विज्ञेय परापर ई पर: ४ बी ई
यंवेदो पि वेदस्त्वां, बी ५ शक्तिस्तस्मादाथायते नम: । ख डी ई
दाथायतेनम: १।२ ज दव्यायतेनम:, ६ बी ई स्तुतस्तया ।
६ ए अचिन्यात्वं परशक्ति ( ए १) जिष्णवे ।

----

न भवेदावयोर्भेदः कदाचिदपि चण्डिके ।।
त्वं शक्तिः सर्वभूतानां शिवो हं शाश्वतः परः ।। ८९

शिवशक्तिमयं सर्वं जगत् स्थावरजङ्गमम् ।। ९०
तदाचक्ष्व महेशानि किं करोमि तव प्रियं ।।
एतासामपि शक्तीनां वाञ्छितं सम्भवेदिह ।। ९१

चण्डी उवाच :- देवदेव पुरा युद्धे[1] चण्डमुण्डौ मया हतौ ।।
पुनस्तावेव[2] सम्भूतौ चण्डमुण्डौ महासुरौ ।। ९२

अभयं प्राप्य मातृभ्यो लोकानर्दयतां भृशम् ।।
तेन त्वां शरणं प्राप्तार्थयामि तयोर्वधम् ।। ९३

एतावदेव कर्तव्यं लोकानां त्राणमीश्वर ।। ९४
देवदेव उवाच :- हनिष्ये तौ दुराचारौ[3] लोकानां भयकारिणौ ।।
पश्यन्तु मातरः सर्वा भवत्या सह चण्डिके ।। ९५
वसिष्ठ उवाच :- इत्युक्त्वा[4] जगतां धात्री गुहं[5] सस्मार शंकर ।।
शक्तिमानथ सो भ्येत्य नमश्चक्रे पुरान्तकम् ।। ९६

-----

३ क दुरारौलौ ( ख १ ) युद्धे ( ५ख ) गुहं
४ क इत्युक्त्वा ( ख २ ) स्तदैव

देवदेव उवाच :- महासेन महाबाहो ब्रूहि गत्वा महासुरौ ।।
चण्डमुण्डौ महानाद् युद्धायाह्वयते शिव: ।। ९७

वसिष्ठ उवाच :- इत्या कर्णा वच: शम्भोश्चण्डीशक्ति गिरावृता ।।
प्राह देवं महेशानमिंद मधुरया गिरा ।। ९८

देव्युवाच :- तत्राहं शक्तिमि: सार्द्धं यास्यामि वचनात्तव ।।
दैत्ययो: कथयिष्यामि त्वदुक्तं दूतरूपिणा ।। ९९

वसिष्ठ उवाच :- तथेत्युक्त्वाथ शर्वाणी चण्डी व्योम प्रचक्रमे ।।
सप्तमि: सहिता राजन् शक्तिमि: सौम्यमूर्तिमि: ।। १००

मरूजंगलमासाद्य दुर्गं जलबहिष्कृतम् ।।
उवाच दैत्यौ दुष्प्रेक्ष्यौ हरवाक्यं स्मितानना ।। १०१

देव्युवाच :- अहं दूती महेशस्य चण्डिका यदि वाँ श्रुतम् ।।
यदुक्तं देवदेवेन तदशेषं निशम्यताम् ।। १०२

मर्त्यलोके मनुष्येषु न कश्चिद्विद्यते नर: ।।
राजा वा राजपुत्रो वा यो युवां योधयिष्यति ।। १०३

---

१ बी ई व्योम विचक्रमे (डुए) दर:
२ ए सौन्यमूर्त्तिमी

तदिहागम्यतां शीघ्रं श्रीमाले श्रीविनिर्मिते ।।
युद्धश्रद्धापनोदर्थां[1] करिष्ये नात्र संशयः ।। १०४

युवाभ्यां पीडित लोकाः शरणं मां समागताः ।।
तेषां त्राणं करिष्यामि साम्प्रतं युवयोर्वधात् ।। १०५

वसिष्ठ उवाच - इति चण्डीवचः श्रुत्वा क्रुद्धश्चण्डोऽब्रवीद्वचः[2] ।।
मत्तदं सर्वलोकानां दैत्यानां हर्षवर्द्धनम् ।। १०६

चंडउवाच :- कोयं महेशनामा वै लोके चण्डि निशम्यते ।।
यो माहाह्वयते[3] क्रुद्धः सग्रमाया त्यचेतनः ।। १०७

श्रीमालं त्वमितो याहि मुण्ड सैन्यैः सहात्मनः ।।
तं निहत्य रणे शम्भुं जवात्पार्श्वं ममाव्रज ।। १०८

तथेत्युक्त्व[4] महाराज मुण्डो नाम महासुरः ।।
श्रीमाल माययौ दैत्यौ प्रवृतैः सार्द्धमाहमिः ।। १०९

ततो देव्यः समागत्य पाण्डारूचण्डिकया सह ।।
सर्वं निवेदयामासुः[5] शम्भोश्चण्डविचेष्टितम् ।। ११०

---

१ ए पनोदंवांकरिष्ये
२ ए श्चण्डी
३ ए मामाहूयते
४ ए त्युक्त्वा
५ ए ञ्चक्रुह

अथ सैन्यखुरोद्भूतै रजोभिः सम्वृता मही ।।
न दृश्यन्ते दिनौ नौर्भिनखं नापि बनानि च ।। १११

ये के चिच्चण्डसामीप्ये राजन्नासन् महासुराः ।।
सन्नद्धागाः समस्तास्ते मुण्डेन सह बव्रजुः ।। ११२

अथ देवा द्विजेन्द्राश्च परित्रस्ताः समंततः ।।
शरणं जग्मुरीशानं देवदेवं जगद्गुरुं ।। ११३

बिमानवरमारूढैः स्वैरैर्भूतनायकैः ।।
देवगन्धर्वयक्षाधैरावृतं गगनं नृप ।। ११४

स्वस्ति जेपुर्महात्मानो मुनयो दीर्घदर्शिनः ।।
चकम्पे मेदिनी राजन् सशैलवनकानना ।। ११५

चुक्षुभे च पयोराशिः सह यादोभिरुल्वणैः ।।
ततोऽभूद्भगवान् क्रुद्धः शंकरो लोकशंकरः ।। ११६

अभिदुद्राव तत्सैन्यं समुद्रमिव चागतं ।।
ते मुण्ड प्रमुखा दैत्या दृष्ट्वायान्तं महेश्वरं ।। ११७

---

४ बी बातिके: ५ ई डी बातिके, घ ई ५ भूतमातृकै: ५ ई ततोभू
३ ई बी तत्सैन्यमुद् वेलाम्बुधिसन्निभम्
१ ए दूतैर २ ए नाबभि ३ ए ागा: ६ ए प्रमुखा ६ ए दृष्ट्वा

क्रुद्धं कालानलप्रख्यं विवृतास्यमुखं स्थितम् ।।
मुमुचुः शरसंघातान् शूलानि च परश्वधान् ।। ११८

मुशलार्गलशक्तीश्च स्त्रिशूलानि स हासिभिः ११९

रथिभिः सादिभिः क्रूरैर्गजारोहैश्च सर्वतः ।।
सम्वृतो भून्महादेवः पतंगैरिव पावकः ।। १२०

ततो गृह्य जटामेकां शम्भुः सव्येन पाणिना ।।
दक्षिणेनाहरद्गाढं ततो भस्मोदडीयत् ।। १२१

तेन व्याप्ता दिशः सर्वा विदिशश्च नरेश्वर ।।
न किंचिद्दृश्यते राजन्नन्धकारावृतं यथा ।। १२२

लोचनेषु सुरारीणामन्तर्गतमतीव तत् ।।
दृष्टि-तेजोपहारं च चकार परमद्भुतम् ।। १२३

दैत्यानां दानवानां च तदाजातं विभीषणम् ।।
उज्जहार हरः केशमेकमेव हि पिंगलम् ।। १२४

-o-o-

ए शरघातान्

१ बी शरसंघातम् - ई शरसंघातास्तान्

२ ई बी मुसलार्गला: शक्ती ए- मुशलस्वर्गलाशक्ति

५ बी दक्षिणेनाहरद्

३ ए क्रूरै ४ ए पावक ६ ए नरेश्वर ७ ए दष्टि ८ ए भीषणी

स च प्रज्वालयामास शुष्कं वनमिवानल: ।।
मुण्डस्य पश्यत: सैन्यं भस्मीभूतमभूत्क्षणात् ।। १२५

हरकेशानलेनोच्चैर्दह्यमाना: सुरद्विष: ।।
राक्षसातिस्वरांश्चक्रुर्निस्वनन्तो गता भुवि ।। १२६

अथ मुण्डो भयार्त: सन्नाग्नेयीं ककुभं प्रति ।।
प्रविष्ट: प्राणलोभेन देवदेवस्तमन्वगात् ।। १२७

अर्बुदस्य गिरे: पार्श्वे ममाश्रमसमीपग: ।।
हत्वा शूलेन दैत्येन्द्र: पातितो भुवि शम्भुना ।। १२८

जातो मुण्डस्थलस्तत्र दृश्यते चापि विश्रुत: ।।
श्रीमालदग्निकोणेऽस्ति स देश: पावन: पर: ।। १२९

तत: श्रुत्वा हतं मुण्डं ससैन्यं भ्रातरं नृप ।।
क्रुद्धश्चण्डो भिदुद्राव श्रीमालं मरुजाङ्गलात् ।। १३०
देवान् वित्रासयामास द्विजांश्च भयकृन् महान् ।।
भ्रामयन्लोचने स्थूले दारुणो हेमपिंगले ।। १३१

-०-०-

३ बी त्राणालोभेन, ई-छ व प्रवष्ट: प्राण लोभेन ई प्रनष्ट: ज्ञाणालोभेन
४ ई बी प्रदेश
२ ए न्नाग्नेयींककु
५ ए हंत
(ए१) गतो

अभ्यधावन् महेशानं दैवदग्ध इवाचल:
तमापन्तं[1] सम्वीक्ष्य सैनानीप्रमुखा गणा: ।। १३२

ववर्षु[2]श्छिद्धता दैव्यं शतश: शरवृष्टिभि: ।।

~~दिव्यास्त्रै~~ :० दित्यास्त्रै[8][3]: समरं क्रुद्धा हन्तुकामा महासुरम् ।। १३३

अथ तेनासुरेन्द्रेण गणा मायाभिरर्दिता: ।।
भीतभीता दिशो जग्मु: निष्कीला इव शाल्मले[4][5]: ।। १३४

व्योमगाश्चक्रुराक्रोशान् हन्यमाना: सुरद्विष: ।।
त्राहि त्राहीति देवेश दैत्या[9]दिति बभाषिरे ।। १३५

तत: क्रुद्धो महादेवो मायास्तस्य दुरात्मन: ।।
भालनेत्रानलेनाशु चक्रे भस्मीकृता[6] नृप ।। १३६

त्रिशूलं पाणिना गृह्य कालान्तकयमोपमम् ।।
अभिदुद्राव देवेशो[10] दैत्यं हन्तुमना हर: ।। १३७

अथ चण्डो हराद्भीतस्त्वपासर्पद् रणाङ्गणात् ।
स्वदुर्गं मनसा कृत्वा प्रययौ मरुजाङ्गलान् ।। १३८

-०-०-

४ ई घ शाल्मलि:

५ई शाल्मवले

~~६ ई, ई~~ -6- भस्माकृती (ए१) दिव्यास्त्र:

९ ई- दैत्यादितिभाषिरे ।

१० ई- देवेशोदैत्यं

१ ई- तमापततं

२ ई- ववर्षु

३ ई- द्दिव्यास्त्रैस्समरे

तमभ्यधावदीशान स्तूयमान: सुरोत्तमै: ।।
त्रिशूलगोचरं ज्ञात्वा तं दैत्यं त्रिपुरान्तक: ।।
मरुजंगलमासाद्य प्रोवाचेदं सुरारिह ।। १३९

देवदेव उवाच :- कथं पलायसे चण्डसमरान्निर मम पश्यत ।।
क्षणं तिष्ठ दुराचार शक्तिस्ते विद्यते यदि ।। १४०

अन्यायवर्तिनां धर्म: कुतो वास्ति दुरात्मनाम् ।।
विलुप्य शास्त्रमार्गान्ये प्रवर्तन्ते कुबुद्धय: ।। १४१

न लज्जा न बलं तेषां ये वै न्यायपथातिगा: ।।
कुर्वते साधुविद्वेषं विगर्हन्ते च सत्क्रिया: ।। १४२

मर्तव्यमिति जानामि पृष्ठतो मयि धावति ।।
तत्कथं समरान्मूढ प्रयासि प्राणशंकया ।। १४३

प्राणानपि परित्यज्य सन्तो गच्छन्ति सत्पथम् ।।
अधर्मकर्म कुर्वन्ति प्राणहेतोस्त्वसाधव: ।। १४४

-०-०-

१ ई तमन्यधावदीशान: स्तूयमान: सरोत्तमै:
४ बी हृदि २ ई समरा: त्रियत्रव: ३ ई क्षणादष्ट
५ ई पुरात्मन: ६ ई मार्गान् ७ ई अधर्म्मकर्म्मकुर्वन्तिप्राणहेतो

८ए सुरारिहा
९ए समरान्निरपश्य
१०ए स्तुयमान

वसिष्ठ उवाच :- इत्युक्त: स च देवेन शम्भुना पृथिवीपते ।।
निवृत्त: शूलमुद्यम्य चण्डकोपाकुलेक्षण: ।। १४५

शम्भो: शूलं प्रचिक्षेप भासुरं क्रोधवच्चसम् ।।
तस्यापतत्तदेवाशु देवदेवो महेश्वर: ।। १४६

त्रिशूलं प्राहिणोत्सोऽपि स्फुलिंगप्रकरोल्बणम् ।। १४७

जयेतिवादिनो देवास्तदा सिद्धा महर्षय: ।।
तुष्टुवु: परमीशानं सर्वलोकाभिहारिणम् ।। १४८

तत्त्रिशूलं विभो मार्गे शूलं दग्ध्वासुरक्षिप: ।।
बिभेद वक्षो बलवद् गुह: क्रौंचमिवेषुणा ।। १४९

निपपात महीपृष्ठे त्रिशूलेन हतोऽसुर: ।।
ततो देवा: सगन्धर्वा: सिद्धाश्च परमर्षय: ।। १५०

ताश्चैव मातर: सर्वा: सह चण्डिकयास्तुवन् ।।
प्रणेमुश्च महादेवं वर्षन्त: कुसुमोत्करम् ।। १५१

-०-०-

१ ई सचदेवेन ५ ए मचदेवेन
२ ई निवृत्त:
३ ई मुचस्य
४ ई तुष्टुवुपरमे

(ए६) स्य
(ए७) त्रिशूलं

प्रसन्नाश्च दिशः सर्वाः पवनो विमलः शिवः ।।
सप्रभाण्यभवन् भूप मुखानि त्रिदिवौकसाम् । १५२

ततो देवाः सगन्धर्वाः पुरस्कृत्य पितामहम् ।
श्रीमालं सहस्रेण प्राप्ता ऊचुरिदं वचः ।। १५३

देवाऊचुः - देवदेव प्रभो स्वामिन् शरणागतवत्सल[१] ।।
अनेन कर्मणा प्रीता देव किं कुर्महे वयम् । १५४

देवदेव उवाच :- अत्राहं निर्मले लिंगे करिष्यामि स्थितिं[२] सुराः ।।
संहतार्थैरनेकैश्च[३] गणैश्च सविनायकैः ।। १५५

क्षेत्राधिपैश्च भूतैश्च वत्स्यामि सततं सुराः ।।
श्रीमालं क्षेत्रमासाद्य[४] नरा मां पूजयन्ति ये ।।
तेषां युगपदिच्छन्तु दातुमिच्छां दिवौकसः ।। १५६

देवाऊचुः श्रीमाले पूजयिष्यन्ति भक्त्या त्वां नाथ ये नराः ।।
पूजितास्तैर्भविष्यन्ति[५] सर्वे देवाः सवासवाः ।। १५७
कृतानि तैश्चतीर्थानि[६] भविष्यन्ति न संशयः ।। १५८

-०-०-

१ ई वत्सल?
२ ई सुराःस्थितं
३ बी ई स तीर्थे (५) ई सहतीर्थै
४ ई श्रीमालंक्षेत्रमाश्रित्यनरामांसनयंतिये
५ ई पूजतास्तैमविष्यंति
६ ई कृतानियेंनतीर्था

देवदेव उवाच :- पुनः किं ते प्रियं[2] चण्डि करोमि ब्रूहि वाञ्छितं ।।
एतासां देवशक्तीनां यतः श्रेष्ठासि[1] मे मता ।। १५६

चण्डी उवाच :- यदि तुष्टोसि देवेश देयो मे प्रार्थितो वरः ।।
चण्डीश इति नाम्ना वै विख्यातो भव भूतले ।। १६०

देवदेव उवाच :- एवमस्तु जगद्धात्रि चण्डिके वाञ्छितंतव[3] ।।
चण्डीश इति मन्नाम लोकोऽयं कीर्तयिष्यति ।। १६१

एतच्च ब्रह्मदण्डेन ब्रह्माणी कुण्डमुत्तमं ।।
यच्चकार महेशानि प्रियं तन्मे भविष्यति ।। १६२

अत्र क्रीडां करिष्यामि शिवया सह पर्वसु ।।
सह सर्वैः निजगणैः ह्यहोरात्रमतन्द्रितः ।। १६३

स्नास्यन्ति मानवा यत्र श्रद्धया चण्डि पर्वसु ।।
तेषां भूतगणैः सार्द्धं तुष्टो दास्यामि सम्पदः ।। १६४

नरो भूतज्वरार्तो यः कुण्डे स्नास्यति भक्तितः ।।
तत्क्षणादेव चैतस्य ज्वरो नाशं प्रयास्यति ।। १६५

-०-

१ ई सितंसता
२ ए प्रिय
३ ए वञ्छितंतव

पूजयित्वात्र ये चण्डीं शक्तीः सप्त च विश्रुताः ।।
दास्यन्ति देवतास्तेषां वांछितानि न संशयः ।। १६६

ब्राह्मीकुण्डे नरः स्नात्वा श्रीमाले योगिनां प्रिये ।।
योऽर्चयिष्यति मां भक्त्या स देवो न तु मानुषः ।। १६७

चैत्रे मासि त्रयोदश्यां चतुर्दश्यां च चण्डिके ।।
द्रक्ष्यन्ति मामिहागत्य ये नरास्ते न देहिनः ।। १६८

यदा देव्यै वरो दत्तो देवब्रह्मपुरोगमैः ।।
श्रीमालेत्र ततोस्माभिरवतारः प्रतिश्रुतः ।। १६९

चण्डि सर्वेषु तीर्थेषु कृतस्नानो यतेन्द्रियः ।।
लभते यत्फलं तत्स्यादत्रैव मम दर्शनात् ।। १७०

यो नमस्कृत्य चण्डीशं चण्डिकां च शिवप्रियां ।। १७१

प्रणमेच्चण्डमुण्डायां न स पापेन लिप्यते ।। १७२
श्रीतीर्थभुवनांलोके चण्डीश्रीदयितं परं।
तत्र वासी ममाभीष्टः सत्यमेतद्ब्रवीम्यहं।। १७३

-०-०-

१(६-७)- चैत्रमासे ३-(४)- सी नरास्तेन -- देकिन अक्षर
त्रुटि पाठ,४ई डी ख नरास्ते न च देकिनः५बी मामिह्यगत्य नरास्ते
न च देहिनः ।
६ ई ए भुवमंलो
७ ई ब्रवीमिते
२ ए योऽर्च्य
८ ए तत्रासोभागीष्टः

श्रीमाले ये नमिष्यन्ति मां तथा मरुजंगले ।।
तेरहंसर्वतीर्थेषु पूजित: स्यां न संशय: ।। १७४

यावच्चन्द्रश्च सूर्यश्च यावन्मही प्रजा: ।।
स्थितिं तावत्करिष्यामि लिङ्गेऽस्मिन् वरदो नृणाम् ।। १७५

भूमिमानिहसम्भिवश्यलिंगेऽलोक्यपूजिते ।।
चतस्त्रो घटिका यावन्निवत्स्यामि न संशय: ।। १७६

सर्वत्र सुलभो देवि लोकानामहमन्वहम् ।।
श्रीमाले दुर्लभ: किन्तु तथा वै मरुजंगले ।। १७७

वसिष्ठ उवाच :- इत्युक्त्वा समहीपाल देवदेव स्तिरोदधे ।।
चण्डी च साद्धमायाभिर्गता स्थानं यथामितं ।। १७८

अवस्थानं विदधिरे तत्रांशेन सुरेश्वर: ।।
राजन् सर्वाणि तीर्थानि सर्वे च त्रिदशाधिपा: ।। १७९

एकस्तु चतुरो वेदानधीते वा यथाविधि ।।
एक: पश्यति श्रीमाले चण्डीशं हि समं तयो: ।। १८०

-०-०-

३ वी ई यथागतम्
१ ई तेरहंस
२ ई दुर्लभकिंतु
४ ई दानमतिवाय
५ ई एक:पश्यतिचंडी
६ ए स्थिति
6 ए प्रजा

एक: सर्वाणि दानानि ददाति श्रद्धयान्वित:
एक: पश्यति श्रीमाले चण्डीशं हि समं तयो: १८१

एकोऽष्टवाषिकिं विप्रमुपनीते यथाविधि ।।
एक: पश्यति श्रीमाले चण्डीशं हि समं तयो: ।। १८२

२८७
ददाति कपिलामेक: सर्वोपस्करसंयुताम् ।।
एक: पश्यति श्रीमाले चण्डीशं हिसमतयो: ।। १८३

चान्द्रायण-शतं त्वेकश्चरतीह यथाविधि ।।
एक:पश्यति श्रीमाले चण्डीशं हि समं तयो: ।। १८४

प्रासादे देवदेवस्य ध्वजारोपं करोति य: ।।
सवर्सेदयुतंचैकंशिवलोके न संशय: ।। १८५

लिंगात्प्रभृति दंडाग्रं यावय: कुरुते ध्वजम् ।।
दरिद्रो न कुले तस्य कदाचिदपि जायते ।। १८६

ब्राह्मीकुण्डे नर: स्नात्वा चण्डीशं योर्च्चयिष्यति ।।
न तस्य नरके पातो न तस्य यमयातना ।। १८७

राजन् किम्बहुनोक्तेन विधिवादेन वा विभो ।।
श्रीमाले प्राप्य चण्डीशं न पापैबाध्यते नर: ।। १८८

-०-

१ बी ई एको ष्टवार्षिकीं कन्यामुद्वाहयति धर्मत: २८६ई संयुतं
२ बी ई साग्रं
३ बी लिगात प्रभृति यो यावद्दण्डाग्रंकुरुते ध्वजम्

श्लोक
४ ई कुंडेनरस्स्नात्वा

इति ते कथितं सर्वं चण्डीशोत्पत्तिकारणम् ॥
श्रुत्वायन् मानवो भक्त्या नरो न नरकं व्रजेत् ॥ १८६

-०-

इति श्री स्कंद पुराणे एकाशीति साहस्र्यां संहितायां
ब्राह्मविभागे श्रीमालमाहात्म्ये चण्डीश माहात्म्यं नाम षट्त्रिंशोऽध्यायः
॥ ३६ ॥